National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(65): 309-311
© 2026 NJHSR
www.sanskritarticle.com

**Dr.Monojit Mukherjee**
Phd.From Jwaharlal Nehru-University, New Delhi

**Correspondence:**
**Dr.Monojit Mukherjee**
Phd.From Jwaharlal Nehru-University, New Delhi

# अद्वैतवेदान्तोक्तरीत्या सृष्टिप्रक्रिया

**Dr.Monojit Mukherjee**

**भूमिका**

अद्वैतवेदान्ते सृष्टिः इत्युक्ते प्रपञ्चस्य सन्दर्भे वर्णितमस्ति, प्रपञ्चस्य वर्णनाप्रसङ्गे प्रागेव कथनीयं यत् सूक्ष्मभूतेभ्यः सूक्ष्मशरीराणि, तदनन्तरं सूक्ष्मशरीरेभ्यः स्थूलभूतानि उत्पद्यन्ते[1]। विक्षेपशक्तिः इत्यनया सूक्ष्मशरीरेभ्यः स्थूलभूतानि उत्पद्यन्ते[2]। विक्षेपशक्त्या ब्रह्मणः जगत् सृजेत्, इयं सृष्टि जलबुद्बुदवत् इति[3]। सर्वज्ञात्ममुनिभिः कथ्यते यत् आवरण- विक्षेपशक्ति च इत्याभ्यां शक्तिभ्यां अज्ञानं आत्मानं आश्रित्य आत्मानं आच्छादित्वा च मिथ्याप्रपञ्चः सृज्यते[4]। अयं प्रपञ्चः ब्रह्मरूपेण आभासते, अयं प्रपञ्चः साकारः सुगुणविशिष्टश्च। यथा रज्जुंदृष्ट्वा सर्पः इति आभासते, पुनः रज्जुं ज्ञात्वा सर्पस्य भ्रमः नश्यते, तथा एव ब्रह्म ज्ञानं यदा जायते, तदा प्रपञ्चः नश्यते। ब्रह्म निर्गुणं, अखण्डं, सच्चिदानन्दं च। तेन साकं निराकारं अज्ञानं अपि नश्यते। ब्रह्मणा ईक्षणपूर्वकं हिरण्यगर्भसंज्ञकः समष्टिप्राणः सृज्यते। तस्मात् प्राणात् शुभकर्महेतुभूतश्रद्धा सृज्यते । तया सृष्ट्या कारणस्वरूपमहाभूताः सृज्यन्ते ।

**विषयः**

पञ्चीकरणम्- प्राक् प्रत्येकभूतानि द्विधा विभज्य तदनन्तरं प्रथमभागः चतुर्धा विभज्य चत्वारि भूतानि इत्येभिः सह द्वितीयं भागं मिलित्वा आकाश, वायुः, तेजः, जलं, पृथिवीः इति पञ्चभूतानि उत्पद्यन्ते।

सूक्ष्माकाशस्य पञ्चीकरणं- १/२ आकाश + १/४ वायु: + १/४ अग्नि: + १/४ जलं १/४ पृथिवी: = स्थूलाकाशं।

सूक्ष्मवायो: पञ्चीकरणम्- १/२ वायु: + १/४ आकाशं + १/४ अग्नि: + १/४ जलं + १/४ पृथिवी: = स्थूलवायु:।

सूक्ष्माग्निः पञ्चीकरणम्. १/२ अग्निः + १/४ वायुः + १/४ आकाशम् + १/४ जलम् + १/४ पृथिवीः = स्थूलाग्निः।

सूक्ष्मजलस्य पञ्चीकरणम्. १/२ जलं + १/४ वायुः + १/४ अग्निः + १/४ आकाशम् + १/४ पृथिवीः = स्थूलजलम्

सूक्ष्मपृथिवी पञ्चीकरणम्. १/२ पृथिवीः + १/४ वायुः + १/४ अग्निः + १/४ जलं + १/४ आकाशः = स्थूलपृथिवीः[5_6]।

**त्रिवृत्करणम्**

त्रिवृत्करणस्य अर्थः अग्निः, जल, पृथिवीः इति त्रयाणां भूताणां संमिश्रणम्। प्राक् प्रत्येकं भूतं द्विधा विभज्य पुनः प्रत्येकं भागं द्विधा विभज्य परस्परसंमिश्रणं त्रिवृत्करणम् इति कथ्यते । इथ्थं अग्निः, जलं, पृथिवीः इत्येतेषां अर्धभागः स्वस्मिन् वर्त्तते, एवं च अन्तिमभूतानि चतुर्धा विभज्यन्ते। पुनः प्रत्येकभूतेषु स्वस्य प्राधान्यं वर्त्तते, अन्तिमस्य भूतद्वयस्य गौणभावः वर्त्तते[7]।

१/२ अग्नि: + १/४ जलं + १/४ पृथिवी: = अग्नि:

१/२ जलं + १/४ पृथिवी + १/४ अग्नि: = अग्नि:

१/२ पृथिवी: + १/४ अग्नि: + १/४ जलं = पृथिवी:

**स्थूलप्रपञ्चस्य उत्पत्तिः**

आकाशादिभ्यः प्रपञ्चस्य उत्पत्तिः भवति। प्रपञ्चस्य परिचयसन्दर्भे उल्लिख्यते यत् लोकालोकपर्वतै स आवृत्तचतुर्दशभूवनानिसंयुक्त-प्रपञ्चःसृज्यते।

तेषां मध्ये पृथिवीः समुद्रश्च इति द्वौ वर्त्तेते। चतुर्दशभूवनानि भवन्ति- भूः, भूवः स्वः महः, जनः, तपः सत्यम् इति सप्तोर्ध्वलोकाः। अतलं, वितलं, सुतलं, रसातलं, तलातलं, महातलं, पातालं इति सप्तनीम्नलोकाः[8]। पुनः उल्लिख्यते यत् अयं लोकः पृथिव्या आच्छाद्यते। लोकाः द्वात्रिंशत् देवरथह्नयान्यं इति कथ्यते[9]। पुनः आलोच्यते यत् पञ्चीकृतभूतेभ्यः ब्रह्माखण्डातिरिच्य चतुर्विधस्थूलशरीराणि उत्पद्यन्ते। इमानि चत्वारि शरीराणि भवन्ति-

1.जरायुजगर्भाशयेभ्यः मनुष्यः पशु इत्यादयः उत्पद्यन्ते।

2.अण्डेभ्यः पक्षी, सर्पः इत्यादयः उत्पद्यन्ते।

3.भूमिं उद्भिद्य तृण-वृक्ष इत्यादयः उत्पद्यन्ते।

4.स्वेदेभ्यः मत्सानि उत्पद्यन्ते।

इमानि चत्वारि स्थूलशरीराणि वैश्वानरः इति कथ्यते। इदं सर्वनराभिमानित्वं इत्यनेन विशिष्यते[10]। महाप्रपञ्चस्य उत्पत्तिः स्थूल- सूक्ष्म- कारण इत्येमाः सृष्टयः महाप्रपञ्चः इति कथ्यते। यथा- विभिन्नवनानां समष्टि महावनं इति कथ्यते। तथैव स्थूल- सूक्ष्म- कारण इति त्रयाणां प्रपञ्चाणां समष्टिः समष्टिवनं इति आख्यायते। स्थूल- सूक्ष्म- कारण- इति तिसृभ्यः सृष्टिभ्यः उपहितचैतन्यं ईश्वरः, वैश्वानरः हिरण्यगर्भः इति अयोः अभेदः वर्त्तते। इत्थं स्थूल- सृष्टिः समष्टिभ्यः उपहितचैतन्यं वैश्वानरः इति कथ्यते। एवं च स्थूलशरीरव्यष्टेः उपहितचैतन्ये वनावच्छिन्नाकाशं वृक्षावच्छिन्ना-काशवत् अभेदः वर्त्तते[11]।

पुनः मुण्डकोपनिषदि आलोच्यते यत् ज्ञानेन ब्रह्म स्थूलत्वं प्राप्यते इति। अस्मात् अन्नं उत्पद्यते, पुनः प्राणः, मनः, सत्यं, लोकः, कर्म इति अमृतसज्ञकं कर्म उत्पद्यन्ते[12]

पुनः यः सर्वज्ञः सर्ववित् तस्मात् ब्रह्मणः नाम-रूप-अन्न इत्येमे पदार्थाः उत्पद्यन्ते[13]।

पुनः ऐतरेयोपनिषदि आलोच्यते प्रागेव आत्मा एकैव आसीत् तेन विना कोऽपि नासीत्[14]।

पुनः आलोच्यते यत् ब्रह्मणः अम्भः, मरीचीः, मरः ,आपः , इमेः लोकाः उत्पद्यन्ते, यः द्युलोकात् परः अन्तरिक्षं मरीची एव। पृथिवी मरलोकः, नीम्ने अस्ति आपः[15]।

**उपसंहारः**

अयमेव सिद्धान्तः आगच्छति यत् अज्ञानस्य आश्रयः विषयस्तु ब्रह्म एव। अज्ञानस्य विक्षेपशक्त्या सूक्ष्मभूतेभ्यः सूक्ष्मशरीरं तथा स्थूलभूताणां उत्पत्ति भवति। इदं तु पञ्चीकरणं इति कथ्यते। पञ्चीकरणस्य प्रामाणिकतासन्दर्भे उच्यते यत् तेजादि त्रायाणां भूताणां उत्पत्ति आकाशं, वायुः च इत्याभ्यां परं भवति। तेजादयः त्रायाणां भूताणां त्रिवृत्करणं इत्युक्त्वा आकाशादिपञ्चानां भूताणां पञ्चीकरणं अनायासे अवबोध्यते। आकाशादिः पञ्चीकृतभूतेभ्यः सर्वब्रह्माण्डः उत्पद्यते। पञ्चीकृतभूतेभ्यः चर्तुविधस्थूलशरीराणि उत्पद्यन्ते। चर्तुविधस्थूलशरीराणां समष्टि-उपहितचैतन्यं वैश्वानरः इत्युच्यते। अयं वैश्वानरः विभिन्नरूपेण सर्वेषु प्राणिषु विराजमानः। वैश्वानरः सर्वेषु प्राणिषु अहम् इति रूपेण अधिष्ठीयते, तदर्थं वैश्वानरः इति शब्दः समीचिनः। चर्तुविधस्थूलशरीराणां व्याष्टि-उपहितचैतन्यं विश्वः इति कथ्यते। अयं विश्वः विभिन्नरूपेण सर्वेषु शरीरेषु विराजमानः ।

**ग्रन्थसूची**


- अद्वैतसिद्धिः. मधुसूदनसरस्वतीकृता. चैखम्बासंस्कृतसीरीज, वाराणसी, 2005
- ईशादि नौ उपनिषद्. गीताप्रेस, गोरखपुर, 2012
- पञ्चदशी.विद्यारण्यमुनिप्रणीता.भारतीयविद्यासंस्थानम्,वाराणसी, 2014
- ब्रह्मसूत्रम्. वादरायणकृतं, मोतिलाल वणारसी दास, नवदेहली, 2003
- ब्रह्मसूत्राशाङ्करभाष्यभामतीव्याख्या. वाचस्पतिमिश्रकृता. मोती-लाल वनारसी दास, नवदेहली, 1998
- ब्रह्मसूत्राशाङ्कभाष्यरत्नप्रभाटीका. गोविन्दानन्दकृता. भारतीय बुक कर्पोरेशन, नवदेहली, 2010
- ललिताव्याख्योपेतन्यायमालाशाङ्करभाष्यसम्बलितसूत्राम् केलाश पीठाधीश्वरपरमादर्शाचार्यमहामण्डलेश्वरानन्त श्रीविभूषित स्वामी विद्यानन्दगिरिराजः, कैलाशविद्या प्रकाशनम्, 2001
- वेदान्तपरिभाषा. धर्मराजाध्वरीन्द्रप्रणीता. चैखम्बासंस्कृतसीरीज, वाराणसी, 2011
- वेदान्तसारः. सदानन्दयोगीन्द्रप्रणीतः. मोतिलाल वनारसी दास, नवदेहली, 2009
- श्रीमद्भवद्गीता. गीताप्रेस, गोरखपुर, 2008
- सर्वदर्शनसङ्ग्रहः. माधवाचार्यकृतः. चैखम्बा विद्याभवनम्, वाराणसी, 2014
- सांख्यतत्त्वकोमुदी. वाचस्पतिमिश्रप्रणीता. चैखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2012


**आंग्लोग्रन्थाः**


Aparokshanubhuti by Sankaracharya. Advaita ashrama, Kolkata, 1987

Atmabodha by Sankaracharya. Ramakrishana Matha, Chennai, 1947

Brahmasutranuvruti by Jaynendra Saraswati. Sankracharya vidyapitham, Varanasi, 1987
Brahmasutra Sankara Bhasyam. Parimal prakashan, Delhi, 1981
Panchadasi by Vidyaranyamuni. Ramakrishna Vedanta Math, Kolkata, 2001
The Brahmasutra and their principal commentary by V.M Apte Munshiram Manoharlal, pvt. Ltd, 2001
Upanishads. F. Max Muellar. Prakash Books India Pvt. Ltd., Delhi, 2001
Vedantadarshan by Vyasadeva. Gita press, Gorakhpur, 2013
Vedantaparibhasha by Dharmaraja Adhvarindra Choukhamba Sanskrit series, Varanasi, 1990
Vivek Chudamani by Sankaracharya. Gita press, Gorakhpur, 2015

**कोशग्रन्थाः**

- अमरकोशः. अमरसिंहकृतः. निर्णय सागर प्रेस बम्बई, *1961*
- वाचस्पत्यम्. चैखम्बासंस्कृतग्रन्थमाला, वाराणसी, *1968*
- Encyclopaedia of Indian philosophy by Karl H. Potter, Motilal Banarasi Das, Delhi, 1970
- English-Sanskrit dictionary by Monier William. Munshiram Manoharlal Das, Delhi, 1976.

**E Sources-**

www.google.com
www.indiacat.in
www.jnu.ac.in
www.worldcat.in

**पाद टिप्पणी**

1 एतान्येव सूक्ष्मभूतानि तन्मात्रण्यपञ्चीकृतानि चोच्यन्ते। एतेभ्य: सूक्ष्मशरीराणि स्थूलभूतानि, चोत्पद्यन्ते। वेदान्तसार: १२

2 विक्षेपशक्तिर्लिङ्गिद ब्रह्माखण्डान्तं जगत् सृजेत्। वाक्यसुधा, पृ. १३

3 ब्रह्मादिस्थावरान्तं जगत् जलबुद्वुदवत् नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्तिः। वेदान्तसारः, सुबोधिनी टीका ८३

4 आच्छाया विक्षिपति संस्फुरदात्मरूप जीवेश्वरं जगदाकृतिभिर्मृषैव अज्ञानमावरणविभ्रमशक्तियोगाादात्मत्वमात्रविषयाश्रयता वलेन। संक्षेपशारीरिकं १/२०

5 द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुन: स्वस्वेतर द्वितीयां शैर्योजनात्पञ्चपञ्च ते। पञ्चदशी १/२६

6 पञ्चीकरणं तु आकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पञ्चभागान्प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागाानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम्। वेदान्तसारः, पृ. १६०

7 प्रथममेकैकां देवतां द्विधा द्विधा विभज्य पुनरेकैकं भागं द्विधा द्विधा कृत्वा तदितरभागयोर्निक्षिप्य, त्रिवृत्करणं। छान्दोग्योपनिषद, आनन्दगिरिटीका, ६/३/२-३

8 एत एव स्थावरण्यभूतलोकालोक पर्वततदवाह्यपृथिवी तदवाह्य-समुदैः। सहितं ब्रह्मणमित्युच्यते। वेदान्तसारः, विद्वन्मनोरञ्जिजनी, पृ. १०९

9 द्वात्रिंशत् वै देवरथहृनयान्यं लोकस्तं समन्तं पृथिवी द्विस्तावत् पर्येति तां समन्तं पृथिवी द्विस्तावत् समुद्र पर्येति। बृहदारण्यकोपनिषद्, २/३/२

10 सर्वशब्दो विश्व पदपर्याय: विश्वनराभिमानित्त्वाद् वैश्वानरः। वेदान्तसारः, विद्वन्मनोरञ्जिनी, पृ. १११

11 वेदान्तसारः, विद्वन्मनोरञ्जिनी, पृ. १९२

12 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।
अन्नात्प्राणो मन: सत्यं लोका: कर्मसु चामृतम्'॥
मुण्डकोपनिषद् १/१/८

13 'य: सर्वज्ञ: सर्वविद्यस्य ज्ञानमयं तप:
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते'। मुण्डकोपनिषद् १/१/९

14 ओं आत्मा वा इदमेक एवाग्र आसीत्। नान्यत्किञ्चनमिषत् स ईक्षत लोकान्नु सृजा इति। ऐतरेयोपनिषद् १/१/१

15 स इमांल्लोकानसृजत्। अम्भो मरीचीर्मरमापोदोऽम्भो परेण दिवं द्यौ: प्रतिष्ठान्तरिक्षं मरीचय: पृथिवी मरो या अधस्तात् आप:।
ऐतरेयोपनिषद् १/१/२